HSS - 15
Code no: - 15

[stamp]

# संस्कृत कथारचना

## विषयः - विश्वासः ।

## स्वप्नाः साक्षात्कृताः ॥

आषाढमासस्य किमपि सायाह्नम् । चक्रवाले सर्वत्र श्यामवर्णः समागताः । दिक्षु यत्रकुत्रापि मेघगर्जनानि श्रुण्वन्ति । दुन्दुभिनादः । वायुः वेगेन वाति । सागरतरङ्गाः अट्टहासं कुर्वन्तः तीरे शक्त्या घट्टयन्ति सागरपक्षिणाः भीताः आक्रन्दनं कुर्वन्तः डयन्ते । मेघाः अजस्त्रं वर्षणं अकुर्वन् । नद्याः पूर्णा जाता । नद्याः कूलानि भञ्जयन्त्यः प्रवहन्ति । प्रकृतेः भीकरदृश्यं पश्यन्तः जनाः स्वगृहेषु शरणं प्राप्नुवन्ति ।

यानस्थाने एकस्मिन् कोणे स्थापितः आसन्दे सुनिल एकाकि उपाविशनासीत् । प्रकृतेः विकाराः तस्य मनसि भयं न अजनयन्त । सः अतीव अस्वस्थः । दुःखनिमग्नं

मनः। तस्य वदने अतीव सन्त्रासः प्रतीयते। किं एतादृश्याः अवस्थायाः कारणम्।?

स्नेहमात्रविकारेण जीवत् किञ्चन कुटुम्बम्। पिता माता सुनिल चेति स्वर्गसमानजीवनमेव तत्। पिता कस्मिन् यन्त्रागारे कर्मकरः। अतिवस्नेहेन सः कुटुम्बं पालितवान्। सुनिल पठनविषये अतिसमर्थः। न केवलं पठनविषये अपि च कलाकायिकप्रवर्तनेषु च निपुणः। सर्वे वदन्ति, "एतादृशपुत्रप्राप्त्यर्थं तपः करणीयं" इति बाल्यात् कौमारे कौमारात् यौवने च तस्य वृद्धिं वीक्ष्य पुलकितगात्रौ पितरौ। सुनिल विजयसोपानानि आरुरोह।

~~अहो कष्टम्।~~

तस्य पिता सर्वदा वदन्ति, "प्रियपुत्र, त्वं भविष्यकाले एकः उत्तमः कर्म स्वीकरोतु। एवं साधुसज्जनेभ्यः दीनदुःखितेभ्यः च सेवां करोतु। एतत् एव मम अभिलाषम्" इ सुनिल तदर्थं प्रयत्नं अपि अकरोत्। अहो कष्टम्... । तस्य सकलसुखसौभाग्यानि अकस्मादेव समाप्तानि। एकदा यन्त्रागारात् निर्गमनसमये वाहनापघाते पितुं आतुरालये प्रवेशितवान्। तीव्रपरिचरविभागस्य पुरते

सुनिल इतस्ततः भ्रमन्ति। केशेषु हस्तं स्थाप्या सः पुनः पुनः प्रकोष्ठस्यान्तः अपश्यत्। मातुः दीनरोदनं सर्वेषां हृदयं अपहरत्। यदा भिषग्वरः बहिरागच्छतः तदा सः तस्य समीपम् जवेनागच्छत्। तस्य स्कन्धे हस्तं स्थाप्य सः अवदत् "अस्माकं शक्तेः सीमां उल्लङ्घ्य प्रयत्नं कृतवान्। किन्तु...." तस्य वचनस्य समापनात्पूर्वमेव सुनिल प्रकोष्ठस्यान्तः जवेनागच्छत्। सः अपश्यत् शुभ्रवस्त्राङ्कितं स्वस्य पितरम्। मातुः आर्द्ररोदनं।

कण्ठः विनष्टशब्दः। अन्तः कोऽपि भारः। परितः सर्वं परिभ्रमणं कुर्वन्तीति सुनिल अचिन्तयत्। अन्तः स्थितं कोऽपि दूरंगच्छतीव। तत् अङ्गीकर्तुं सः शक्तो नास्मि। तस्य मनसि पितुः स्मरणाः चित्रमाला इव अगच्छत्। तदा सः अचिन्तयत् पितुः अभिलाषं।"

"पिता...., तव अभिलाषमिव अहं एकं उत्तमं आइ.ए.एस. ~~उद्योगस्तः~~ अधिकारि भविष्यन्ति। एवं साधुनां सेवा

करिष्यामि। अहं विश्वासं करिष्यामि, त्वं सदा मम साकं वर्तते इति। एवं स्वप्न साक्षात्कारार्थं मम सहायं करिष्यति"। सुनिल दृढं निश्चयं कृतवान्।

पितुः मरणेन कुटुम्बस्य आश्रयः एव विनष्टः। माता पुत्रस्य भविष्यं विचिन्त्य दुःखाकुला अभवत्। कुटुम्बस्य व्ययः कदं करणीयामिति सा चिन्तयितुम् आरब्धवति। अतः सा समीपस्थान् गृहेषु एवं भोजनालये कर्म कृतवती। सा पुत्रस्य सर्वाण्यापि कार्याणि यथायोग्यं कृतवती। सुनिल अतीवनिपुणः। सः देशस्य विद्यालयस्य च प्रशंसापात्रं अभवत्।

ऋतवः परिवृत्ताः। सुनिल अधुना कलाशाला पठन्ति। अहो.... निरन्तर कठिनप्रयत्नेन माता शय्यावलम्बनी अभवत्। अशनिपात इव हृदरोगि च अभवत् सुनिलस्य पठनार्थं धनं आवश्यकं। सः अचिन्तयत्। "सर्वगुणसम्पन्नाः दुःखं अनुभवन्ति। निर्गुणाः धनिकाः सुखेन जीवन्ति। मम पठनार्थं धनं अपि आवश्यकं। ~~कुतो आन~~ कुतः आनीय ददाति तावत् धनं? किन्तु

मम विश्वासः अस्ति यत् मम पिता सदा मम साकं अस्ति। अतः मम दुःखसमयेषु सः आगच्छति।" तस्य स्वप्न साक्षात्कारमेव मम जीवनाभिलाषं।"

किन्तु मातुः चिकित्सार्थं सः पठनं त्यक्त्वा कर्म कृतवान्। सः समीपस्थां छात्राणां विविधविषयाणि पाठितवान्। गृहे गृहे गत्वा वस्तूणां विक्रयणाय प्रयत्नं कृतवान्। आपणेषु कर्म कृतवान्। विविधानि कर्माणि सः यथायोग्यं सन्तोषेन च कृतवान्। किन्तु तस्य मनसि एका एव चिन्ता। के. ए. एस्. परीक्षा। यद्यपि पठनाय अतिनिपुणः तथापि तस्य हस्ते धनं नासीत्।

एकदा सुनिल वस्तूनां विक्रयणाय एकं गृहे अगच्छत्। तत् तस्य मित्रं सतीशस्य गृहं आसीत्। सः अधुने विदेशे कर्म करोति। सः धनिकः सञ्जातः। सुनिल दृष्ट्वा सतीशः अद्भुतस्तब्धः अभवत्। मित्रोः कुटुम्बस्थितिं ज्ञात्वा सः दुःखितः अभवत्। सतीश कष्टे पतितानां सुहृदानां विषये विशेषानुकम्प प्रकटितवान्। कियता श्रमेणापि सः तेषां सहाय्यं कर्तुं उद्युक्तः।

~~सूर्यं अतिक्रम्य~~

समयं अतिक्रम्य सूर्यः चरमागिरीं प्राप्तवान्। घोरान्धकारः भूमौ प्रसरितः। तदा सुनिलस्य स्कन्धे कोऽपि स्पृष्टवान्। तस्य मित्रं सतीशः एवासीत् तत्। दृष्टान्तं अक्षयन्तः दीपौ इव तस्य दुःखनिवारणाय सः अधुना अगच्छत्। सः अवदत् "तव विश्वासः इव ~~तव~~ पिता एतव समीपे सदा आस्ति। तव पठनार्थं मातुः चिकित्सार्थं च अहं धनं दास्यामि। अहं स्मरामि, मम विदेशगमनार्थं तव पिता एव धनं अदात्। अतः एतत् मम कर्तव्यम्।"

सुनिल सन्तोषाधिक्येन सतीशं आलिङ्कतवान्। सदा तस्य मनसि विश्वासः ~~अस्ति~~ आसीत् यत सर्वे ~~प्र~~ समस्यानां परिहारोपायः अस्ति इति। तदा एको मृदुनानिलः तस्य पादं मृदुत्येन संस्पृश्य तद्वारा अतिजगाम।

सुनिल जनपदसेवा परीक्षायां उत्तमेन अङ्केन उत्तीर्णः जातः। सः पितुः अभिलाषं साक्षात्कृतवान्।

'सः विद्यालयानि शिशुसदनानि च निर्मितवान्। दरिद्रेभ्यः उत्तमं चिकित्सा पठनसहाय्यं च अदात्। जनसेवा कर्मेषु अहोरात्रं प्रयत्नं कृतवान्। शनैः सः प्रश्नाभ्यां मुक्तः अभवत्।

पौषमासः समागतः। वसन्तमासप्रभावेण वृक्षेषु पुष्पाणि समृद्धानि आसीत्। तुषारे पतितानि सूर्यकिरणानि विकल्पितः इन्द्रधनुः नयनमनोहरं भवति। तस्य जीवितंजीवनं अपि अतीवसन्तुष्टः। अतोऽहं ब्रूहि "ब्रूहि,

" **विश्वासः एव सर्वस्य आधारः**" ॥

———— शुभम् ————